# shrIgaNeshastotram

# શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : gaNeshastotram from AdityapurANa

File name : gaNeshastotramAdityapurANa.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Description-comments : Path Pustakam 1934 Srinagar Kashmir Mercantile Press

Source : Adityapurana

Latest update : April 22, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીગણેશસ્તોત્રમ્

આદિત્યપુરાણાન્તર્ગતમ્

શ્રીગણેશાય નમઃ ।

સિન્દૂરકુઙ્કુમહુતાશનવિદ્રુમાર્ક-
  રક્તાબ્જદાડિમનિભાય ચતુર્ભુજાય ।
હેરમ્બભૈરવગણેશ્વરનાયકાય
  સર્વાર્થસિદ્ધિફલદાય ગણેશ્વરાય ॥ ૧॥

ચિદચિત્પદગમ્ભીરં ગમાગમપદોજ્ઝિતમ્ ।
ગહનાકાશસઙ્કાશં વન્દે દેવં ગણેશ્વરમ્ ॥ ૨॥

શ્રીસનત્કુમાર ઉવાચ ।
શઙ્કરાદ્બ્રહ્મણા પ્રાપ્તં પદ્મયોનેર્મયા પ્રભોઃ ।
તદહં કીર્તયિષ્યામિ સ્તોત્રં પરમદુર્લભમ્ ॥ ૩॥

ષષ્ઠ્યાં ચતુર્થ્યામષ્ટમ્યાં ચતુર્દશ્યાં વિશેષતઃ ।
પૂજયેચ્ચ ગણાધ્યક્ષં શ્રદ્ધાભક્તિસમન્વિતઃ ॥ ૪॥

અર્ઘ્યૈઃ પુષ્પૈસ્તથા ધૂપૈર્દીપૈર્માલ્યૈશ્ચ ચામરૈઃ ।
વસ્ત્રૈઃ કુણ્ડલકેયૂરૈર્મૌલિભિશ્ચ વિતાનકૈઃ ॥ ૫॥

ભક્ષ્યૈર્ભોજ્યૈરપૂપૈશ્ચ મત્સ્યૈર્માંસૈશ્ચ મોદકૈઃ ।
પાનકૈઃ ફલમૂલૈશ્ચ હોમૈર્મન્ત્રાદિભિસ્તથા ॥ ૬॥

ગઙ્ગાહૃદે તુ ગાઙ્ગેયં શ્રીશૈલે તુ ગણેશ્વરમ્ ।
વારાણસ્યાં ગજવક્ત્રં ગયાયાં ટઙ્કધારિણમ્ ॥ ૭॥

પ્રયાગે તુ ગણાધ્યક્ષં કેદારે વિકટાનનમ્ ।
લમ્બોદરં કુરુક્ષેત્રે નૈમિષે ચ મદોત્કટમ્ ॥ ૮॥

જમ્બુકં દણ્ડકારણ્યે લોકેશં હિમવદ્ગિરૌ ।

વિશ્વક્સેનં તુ વિન્ધ્યાદ્રૌ મલયે હેમકુમ્ભકમ્ ॥ ૯॥

નાયકં પુષ્કરદ્વીપે વિઘ્નેશં શલ્મલે સ્થિતમ્ ।
ઇલાવૃતે વિશ્વરૂપં હરિવર્ષે ઘટોદરમ્ ॥ ૧૦॥

ત્રિનેત્રં સિંહલદ્વીપે શ્વેતદ્વીપે તુ વામનમ્ ।
ઉજ્જયિન્યાં ચ લમ્બોષ્ટં માલવે શૂર્પકર્ણકમ્ ॥ ૧૧॥

સૌરાષ્ટ્રે વરદં દેવં કશ્મીરે ભીમરૂપિણમ્ ।
સિન્ધુસાગરયોર્મધ્યે સ્થિતં વૈ મન્ત્રનાયકમ્ ॥ ૧૨॥

હર્યક્ષં યક્ષભવને હરિયક્ષાભિધં વિભુમ્ ।
પદ્માભરણનામાનં કૈલાસે પરમેશ્વરમ્ ॥ ૧૩॥

મહાયોગં મહેન્દ્રે ચ સહ્યે વારાહરૂપિણમ્ ।
મહોદરં ચ લુમ્પાયાં ચમ્પાયાં શિખિવાહનમ્ ॥ ૧૪॥

પાશહસ્તં ત્રિકૂટે ચ પૂજયેત્સર્વસિદ્ધિદમ્ ।
બલમગ્નિગુહાયાં ચ પાટલે સિંહવાહનમ્ ॥ ૧૫॥

પૌણ્ડ્રે રૌદ્રમુખં ચાપિ કલાપિગ્રામકે જયમ્ ।
મેરુપૃષ્ઠે કામરૂપં નન્દનં નન્દને વને ॥ ૧૬॥

વિજયં વૈ ગન્ધવને દેવદારુવને ગણમ્ ।
આર્તાનાં વિઘ્નહરણં ગઙ્ગાસાગરસઙ્ગમે ॥ ૧૭॥

મહાપથે વિરૂપાક્ષં ચિત્રકૂટે મદોત્કટમ્ ।
દુર્જયં યમુનાતીરે સ્તમ્ભનં ગન્ધમાધને ॥ ૧૮॥

ભદ્રવટે ચામ્બરીશં મોહનં હસ્તિનાપુરે ।
કિષ્કિન્દાયામુગ્રકેતું લઙ્કાયાં તુ વિભીષણમ્ ॥ ૧૯॥

કલિઙ્ગે વરુણં ચૈવ ગાન્ધારે ચ મદોત્કટમ્ ।
અશ્વત્થં ચ તુરુષ્કેષુ ચીને શત્રુજયાવહમ્ ॥ ૨૦॥

વજ્રહસ્તં કોસલેષુ દાક્ષિણાત્યેષુ લોહિતમ્ ।
શૂલોદ્ધૃતકરં ચૈવ મધ્યદેશે પ્રકીર્તિતમ્ ॥ ૨૧॥

એકદંષ્ટ્રં પશ્ચિમાબ્ધૌ પૂર્વદેશે પરાજિતમ્ ।
ઉત્તરે ચારુવક્ત્રં ચ વરિષ્ઠં ત્રિપુરેષુ ચ ॥ ૨૨॥

સુવર્ણગર્ભં વિઘ્નેશં નદીનાં સઙ્ગમે સ્થિતમ્ ।
ગિરિસન્ધિષુ વિજ્ઞેયં હિરણ્યકવચાભિધમ્ ॥ ૨૩॥

સુમુખં નાગરન્ધ્રેષુ નર્મદાયાં ચ ષડ્ભુજમ્ ।
મહાપુરે મહામાયાં ભદ્રકર્ણે હ્રદે શિવમ્ ॥ ૨૪॥

ગોકર્ણે ગજકર્ણં તુ કાન્યકુબ્જે વરાનનમ્ ।
પદ્માસનં કામરૂપે શ્રીમુખં સર્વતઃ સ્થિતમ્ ॥ ૨૫॥

વેદવેદાઙ્ગશાસ્ત્રેષુ પૂજયેદ્બ્રહ્મણસ્પતિમ્ ।
અષ્ટાષષ્ટિસ્તુ નામાનિ સ્તુતાન્યદ્ભુતકર્મણઃ ॥ ૨૬॥

નિત્યં પ્રભાતકાલે તુ ચિન્તયેદ્ગણનાયકમ્ ।
એતત્સ્તોત્રં પવિત્રં ચ માઙ્ગલ્યં પાપનાશનમ્ ॥ ૨૭॥

શસ્ત્ર-ખાર્ખોદ-વેતાલ-યક્ષ રક્ષો ભયાપહમ્ ।
ચૌરારણ્યભયવ્યાઘ્રવ્યાધિદુર્ભિક્ષનાશનમ્ ॥ ૨૮॥

કૃત્યાદિમાયાશમનં સર્વશત્રુવિમર્દનમ્ ।
ત્રિકાલં યઃ પઠેદ્ભક્ત્યા સ ભવેત્સર્વસિદ્ધિભાક્ ॥ ૨૯॥

ગણેશ્વરપ્રસાદેન લભતે શાઙ્કરં પદમ્ ॥ ૩૦॥

ઇતિ આદિત્યપુરાણે ગણેશસ્તોત્રં  સમ્પૂર્ણમ્ ॥

Encoded and proofread by Jonathan Wiener wiener78 at sbcglobal.net

---

*shrIgaNeshastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*